# श्री सोमनाथसंस्कृत-युनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा, अक्तुबर - 2019

| | | |
|---|---|---|
| **कक्षा – शास्त्री-2** | **सत्रम् – 3** | **गुणाः - 70** |
| **विषयः –** पुराणेतिहासः | **प्रश्नपत्रम् - 5 - CC - 2.3.5** | **समयः - 8 तः 11** |
| **दिनाङ्कः- 14/10/2019** | **संदर्भग्रन्थः –** भागवते चतुर्थस्कन्धः | |

**( प्रथमान्वितिः - युनिट-1 )**

**प्र-1 द्वयोः श्लोकयोः ससन्दर्भप्रसङ्गं व्याख्या कार्या। 10**

1. तथारिभिर्न व्यथते शिलीमुखैः शेतेऽर्दिताङ्गो हृदयेन दूयता।
   स्वानां यथा वक्रधियां दुरुक्तिभिर्दिवानिशं तप्यति मर्मताडिताः ।।
2. विद्यातपोव्रतधरान् मुखतः स्म विप्रान् ब्रह्माऽऽत्मतत्त्वमवितुं प्रथमं त्वमस्राक्।
   तद् ब्राह्मणान् परम सर्वविपत्सु पासि पालः पशूनिव विभो प्रगृहीतदण्डः ।।
3. सत्याऽऽशिषो हि भगवंस्तव पादपद्ममाशीस्तथानुभजतः पुरुषार्थमूर्तेः।
   अप्येवमार्य भगवान् परिपाति दीनान् वाश्रेव वत्सकमनुग्रहकातरोऽस्मान् ।।

**प्र-2 शिवदक्षयोः वैमनस्यप्रसङ्गं सविस्तरं वर्णयत। 10**

**अथवा**

**ध्रुवचरितम् - विस्तरेण लिखत।**

**( द्वितीयान्वितिः - युनिट-2 )**

**प्र-3 द्वयोः श्लोकयोः ससन्दर्भप्रसङ्गं व्याखा कार्या। 10**

1. सम्प्रसन्ने भगवति पुरुषः प्राकृतैर्गुणैः।
   विमुक्तो जीवनिर्मुक्तो ब्रह्म निर्वाणमृच्छति ।।
2. ब्राह्मणः समदृक् शान्तो दीनानां समुपेक्षकः।
   स्रवते ब्रह्म तस्यापि भिन्नभाण्डात्पयो यथा ।।
3. श्रेयः प्रजापालनमेव राज्ञो यत्साम्पराये सुकृतात् षष्ठमशम्।
   हर्ताऽन्यथा हृतपुण्यः प्रजाना अरक्षिता करहारोऽघमत्ति ।।

**प्र-4 पृथुना कृतं पृथ्व्याः दोहनं शताश्वमेधान् च वर्णयत। 10**

**अथवा**

**ध्रुवस्य बाल्यवस्थाप्रसङ्गं विवर्ण्य सस्तुतिं तपः वर्णयत।**

**( तृतीयान्वितिः - युनिट-3 )**

**प्र-5 द्वयोः श्लोकयोः ससन्दर्भप्रसङ्गं व्याख्या कार्या। 10**

1. न कुर्यात्कर्हिचित्सङ्गं तमस्तीव्रं तितीरिषुः।

धर्मार्थकाममोक्षाणां यदत्यन्तविघातकम् ।।

2. क्षणार्धेनापि तुलये न स्वर्गं नापुनर्भवम् ।
   भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताशिषः ।।
3. यथा तरोर्मूलनिषेचनेन तृप्यन्ति तत्स्कन्धभुजोपशाखाः ।
   प्राणोपहाराच्च यथेन्द्रियाणां तथैव सर्वार्हणमच्युतेज्या ।।

**प्र-6 कस्याप्यैकस्य सविस्तरमुत्तरं लिखत। 10**

**1. पुरञ्जनोपाख्यानं लिखत।**

**अथवा**

**2. प्रचेतसोभ्यः देवर्षिनारदस्योपदेशः।**

**(चतुर्थान्वितिः - युनिट-4 )**

**प्र-7 दशानां एकवाक्येन उत्तराणि लिखत। 10**

1. चतुर्थस्कन्धस्य लीलायाः नाम किम्
2. पृथोः ज्येष्ठपुत्रः कः
3. दक्षस्य शिरच्छेदं कः करोति
4. कति श्लौकैः दक्षः शिवस्तुतिं करोति
5. ध्रुवस्य जननी का
6. कति मासान्ते ध्रुवः तपसः फलं प्राप्नोति
7. ध्रुवस्य पुत्रः कः
8. उत्तमस्य पितरौ कौ
9. कः ध्रुवं युद्धात् वारयति
10. पृथवे छत्रं कः ददाति
11. पृथवे अग्निना किं नामधेयं धनुः दत्तम्
12. चण्डवेगः अर्थात् कः
13. कस्योपदेशेन प्रचेतसः संसारं न गताः
14. अङ्गस्य पुत्रः कः
15. अत्रि शब्दस्य का व्युत्पत्तिः

**************